श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्रीकोदण्डरामपञ्चाशत् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोदण्डरामपञ्चाशत् ॥

आदौ प्रपद्य निखिलान् करुणाभरणान् गुरून्।
कोदण्डकरुणाश्लिष्टं सेवे मधुरराघवम्॥

कोदण्डश्रियमातनोति पदवीमध्यास्थितो दक्षिणां
सञ्चारेण सनाथयन् सुकृतिनो नस्सीतया संयुतः।
श्रीमत्यायतने तडाग सुभगे सेवां दिशन् स स्वयं
भास्वद्देशदिवाकरः करुणया जेजीयते राघवः॥ १ ॥

क्षेत्राणि द्रविडेषुसन्ति बहुधा दिव्यानि सत्वोत्तरा-
ण्यारामादि युतानि तानि भगवत्प्रेष्ठानि पुष्टानि च।
तत्र श्रीमधुरान्तक बहुगुणं पूर्णं महद्भिः पुरं
कोदण्डे श्रियमुद्वहन् विजयते तं दण्डवत् सन्नतः॥ २ ॥

कोदण्डं धरमाण एव धरणित्राणाय बद्धादरो
लीलां दण्डधरत्व रूपमहितां व्यक्तीचिकीर्षुः स्वयम्।
आशां धर्मपतेरुपेत्य कृपया विद्धः परं मादृशान्
त्रातुं संप्रति दिव्यदेशनिलयः प्रीत्या श्रिया भ्राजते॥ ३ ॥

सेवार्थं तपसि स्थिता बहुगुणारामा मुनीन्द्राः प्रभो
सञ्चारेण पुनन्ति देशमखिलं व्यक्तिं तवाशामते।
व्याक्तिस्ते गगने वने च गहने नीरे च तीरेऽम्बुधेः
तस्मात् सञ्चरतां पचेलिमफलं त्वं भ्राजसे राघव॥ ४ ॥

वैशिष्ट्यं परिचिन्वतां इह सतां तुष्टौ न पर्याप्तता
शिष्टा यत्र विशिष्टभक्ति भरिता यत्सेवया निर्वृताः।
आरामे वकुलाटवा परिगते रामाभिरामो भवन्
तत्त्वं साधु हितं च भूरि पुरुषार्थं पुष्कलं यच्छसि॥ ५ ॥

www.prapatti.com

केचिद्रङ्गशयं वदन्ति परया भक्त्या महान्तं प्रभुं
केचित्तान् अनुरुन्धते परमया भक्त्या तथैवादरात्।
शेते साधु समर्चितस्यभवतेत्येवं जगुः कारणं
त्वामेवात्र विदाङ्करोमि करुणापूर्णं महान्तं ध्रुवम्॥ ६ ॥

शास्त्रेणावगतं महत्वमतुलं सङ्केततः कल्पितं
बुद्ध्या वा कुशलैः कुशाग्रधिषणैः सुस्थापित पुष्कलम्।
आस्तां तन्मधुरान्तके तु विदित चाबालवृद्धोदितं
प्रत्यक्षं प्रवदामि पूर्णपुरुषं रामं महान्तं मुना॥ ७ ॥

कोदण्डः करुणामयस्तव करे विभ्राजते शोभनः
कोदण्ड्यो भविता यदास्ति सुभगा पार्श्वे क्षमानन्दिनी।
उच्छ्रायं परमं प्रपद्य सकलान् आकर्षयत्यन्वहं
तं सेवे करुणाकरं मुहुरहं शार्ङ्गावतारं परम्॥ ८ ॥

कोदण्डो वृजिनं विनाशयतु मे यत् वित्तवत् सञ्चितं
यज्ज्यादर्शनतः प्रयाति विलयं सज्यस्य सज्जस्य वा।
ज्यानादो नहि शुश्रुवे कथमपि त्वत्तोऽन्तगैः धुवं
दृश्यं कोमलगातशोभिन इमं कोदण्डमाराधये॥ ९ ॥

एकेनापि कृतेन तुष्यति भवान् साधूपकारेण च
प्राञ्चस्तत्प्रतियन्ति तत्त्वमधुना जानामि निश्चप्रचम्।
ईजे यत्सुत साह्यतो दशरथो येनात्मजं लब्धवान्
तत् कार्तज्ञधिया विभण्डकमुनेः सेवां ददास्यन्वहम्॥ १० ॥

योयस्सेवितुं ईहते प्रभुममुं कोदण्डपाणिं श्रिया-
जुष्टं सत्तपसां पचेलिमफलं प्रादुर्बभूव स्वयम्।
एतच्छ्रीमधुरान्तकं परिगृहीतं वासयोग्यं पदं
संसेव्याशु वयं लभेमहि फलं हित्वापि पुष्टं तपः॥ ११ ॥

विश्वामित्र पुरस्सरेषु विभवे पुष्टेषु ते सेवया
विख्यातेषु तपोधनेषु भगवत्सेवा परेष्वन्वहम्।



www.prapatti.com

अङ्घ्रिभ्यस्समितो विभण्डकमुनिस्त्वां सेवितुं दक्षिणाम्
अर्चयामपि तस्य दर्शनं इह क्षेत्रे ददासि ध्रुवम्॥ १२॥

अब्धिं संपरिशोषयामि गदितं जानामि तीरेंबुधेः
लङ्कां दाहयितुं निजं प्रहितवान् दूतं कपीनां वरम्।
शिष्टं प्लावनमातनोषि कृपया हस्तेन दृष्ट्याच नः
लोकानां मधुरान्तके स्थिरतरा शुद्धिश्च भूतिर्ध्रुवा॥ १३॥

सुग्रीवस्तव सन्निधौ प्रियतमो मैत्रीं परं प्राप्तवान्
आत्मानं सह बन्धुसेवक गणेः धन्यं व्यधात् सेवनात्।
त्वद्वीर्यं परिशङ्कते स्म पुरतः प्रत्यायितः सांप्रतं
नूनं हूणमुरवान् जलाशयमिषात् प्रत्याययस्यद्भुतम्॥ १४॥

लोकान् पासि चतुर्दशाथ विदितस्सर्वेश्वरः सांप्रतम्
अस्मान् रक्षितुं आगतः करुणया मातुर्वचो मानयन्।
किं किं वा न कृतं त्वया वनभुवि प्रीतेन मद्रक्षणे
नामाप्येत्य तडागरक्षक इति ब्रूमः कथं ते कृपाम्॥ १५॥

सन्त्येवात्र बहूनि दक्षिणदिशाभोग्यानि धामानि ते
भक्तास्सन्तु तपस्विनो बहुविधां भूतिं प्रपद्याखिलाम्।
नैतच्छ्रीमधुरान्तकेन समतामाप्नोति दिव्यं स्थलं
वैशिष्ट्यं क्वनु लक्ष्मणस्य विदितं पूर्वापरे जन्मनि॥ १६॥

श्रीसत्यव्रत शेवधिर्वरदराड्राजत्करीन्द्राचले
काञ्चीपूर्णमुनिं षडाहवचनान्यर्चासमाधावपि।
तत्पूर्णाश्रयणं यतश्च घटितं रामानुजस्याञ्जसा
सर्वेषामिह पूर्णता बहुमुखी संपद्यते राघव॥ १७॥

काञ्चीपूर्णनिदर्शितेन सुपथायातोहि रामानुजः
प्राप्य श्रीमधुरान्तकं गुरुवरात् पूर्णाच्च पूर्णोऽभवत्।
संस्कारान् परमान् वसिष्ठमुखतोप्यत्रैव शिष्टोत्तमात्
नूनं प्राप्तवता विभुर्विजयते रामानुजेनाद्भुतम्॥ १८॥

क्षेत्रं श्रीमधुरान्तकं बहुगुणं ग्रीष्मेऽपि शीतोर्जितं
    यत्र श्रीहरितत्त्वमाकलयतां हारीतवर्चो बलम्।
पूर्णं शालिभिरुज्झितं खलगणैर्जुष्टं महद्भिः पुरं
    सत्यं सत्यसमे विभाति मुदितः कोदण्डरामः श्रिया॥ १९ ॥

गंभीरे मधुरे तथैव सुभगे पूर्णे महत्सेविते
    दिव्ये पुष्करसन्निभे सुमहति स्नात्वा मुदाऽकर्दमे।
निर्धूताखिलकल्मषास्सुमनसत्वामुद्यतास्सेवितुं
    पूर्णा धन्यतमा नयन्ति दिवसान् अत्रैव रामाद्भुतम्॥ २० ॥

विश्वामित्रमुखात् इदं सुविदितं त्वां सेवितुं कानने
    सिद्धाः स्वीयतपोबलेन भवतस्तत्त्वं विदित्वा स्थिताः।
तेष्वारादभिवर्षसीव करुणां नेदं विचित्रं प्रभो
    मामज्ञं वृणुषे तथा विवृणुषे मह्यं तनुं स्वामहो॥ २१ ॥

पुण्यां ते महतीं कथां लिखितवान् वाल्मीकिरत्यद्भुतां
    यां च प्रीतिपुरस्सरं परिषदि श्रुत्वा मुदं प्राप्तवान्।
तद्दिव्यं चरितं चकास्ति भुवने रामायणं शोभनं
    मद्वाक्ये कथमादरो भवति ते चिन्तामिमां छिन्धि मे॥ २२ ॥

भक्तास्ते हि तपस्विनो बहुमुखप्रज्ञा बुधैस्संमताः
    शिष्टास्ते प्रभवन्ति वैभवकथास्ता विस्तरात् वर्णितुम्।
अज्ञानं सुदृढं विदन्नपि निजं त्वद्वीक्षणाच्चोदितः
    यद्यद्वच्मि कृपाभरेण मनसा हे राघव स्वीकुरु॥ २३ ॥

रूपं मानुषमादधासि कृपया तत्त्वं ततः किं गतं
    धूर्तो नाशमियाय राक्षसपती रूपं च ते दृष्टवान्।
पुंसां चित्तहरे स्थिते त्वयि तदा सर्वेऽप्यतुष्यन् परं
    अर्चायां तव सेवया वयमिहामोदामहे सांप्रतम्॥ २४ ॥

किं ब्रूयां इह वैभवं गुणगणैर्जेजीयमानस्य ते
    किं कुर्यां चरणारविन्दयुगले सेवां विना सांप्रतम्।

किं तत्त्वं श्रुतिघोषितं भगवतः कोदण्डरामादृते
किं वा जल्पतु पामरोऽपि भुवने किं वा गतं वैभवे॥ २५॥

दिव्यं ते चरणांबुजं भुवि सतां कल्याणकारि ध्रुवं
यत्संबन्धि रजः प्रपद्य महिलाहल्या सुपूताऽभवत्।
भ्रातोपानहमादरेण धरणित्राणाय संसेवते
तेनास्मद्भुवि सञ्चरन् वितनुषे सर्वान् सुपूतान् प्रभो॥ २६॥

माधुर्यं तव नाम्नि साधुविदितं भक्तोपभोग्यं सदा
विश्वामित्रमुनिर्जगाद मधुरां रामेति वाणीं तदा।
मुग्धो रामगुणेषु सत्यवचनस्तातोऽपि रूपे तथा
कोवान्यो भयमश्नुते मयसुतात् ते नाम भोग्यं हि नः॥ २७॥

सन्मध्यस्थितिमिच्छसीति विदितं सर्वैरिदं घोषितं
साधूनां वसतिर्विभासि गगने चन्द्रोपमस्सर्वदा।
कामं सन्तु तपोधना गुरुवराः शाखावतामुत्तमाः
किं ते पूर्णसमागमो वद मुदा जातो यथात्र प्रभो !॥ २८॥

दुःखे दुःख्यसि तोषमेषि जनतातोषे परं मामकं
चेतो मुह्यति निर्वृतिं च भजते श्रुत्वा त्वदीयस्थितिम्।
दुष्टोहं तव तोषणाय विदधाम्यन्यादृशीं वैखरीं
माभूत्ते मम चेष्टितेन हृदये दुःखं कदापि प्रभो॥ २९॥

विश्वामित्रमुनिस्तथा प्रकृतयस्ते चक्षते सद्गुणान्
क्षात्रान् भागवतान् तथेश्वरगतान् स्वस्वानुभूतिक्रमात्।
षाड्गुण्यं बहुभिर्न्यरूपि विशदप्रज्ञैः परं सांप्रतं
भिन्नानेव गुणान् वदन्ति भवतोऽनुक्रोशमुख्यान् प्रभो॥ ३०॥

रूपं तन्मधुरं तथैव चरितं वाणी सुधास्यन्दिनी
दृष्टिः पुष्टिकरी विशिष्ट जनताभीष्टस्य सन्देशिनी।
मुद्राहस्तधृता तथाभयहरा चापरे गभीरो महान्
स्थानं श्रीमधुरान्तकं विजयते कादण्डरामस्य ते॥ ३१॥

आशा मे महती महत्वकथने कोदण्डराम प्रभो
शक्तिर्नास्ति मितंपचोऽस्मि महतां सेवापि दूरङ्गता।
एकैकञ्च पदं प्रभावभरितं विन्दन्ति मुह्यन्ति ये
प्राज्ञास्तत्पद सेवनेन हि विना का वा गतिर्विद्यते॥ ३२ ॥

हे रामायनमद्भुतं पितृपथे ते दक्षिणस्यां दिशि
प्राप्तं साधुतपः फलं च बहुधा येनावनी रक्षिता।
दुष्टानां निधनं सतां च भवतस्सेवाधनं शाश्वतं
संपन्नं मुनिराह रामचरितं रामायणं नामतः॥ ३३ ॥

नीरोपान्तनिवासतोषनिलयः कर्माश्रितो वैदिकं
सन्ध्यास्नानजपादि वैधसुविधा लाभप्रफुल्लाशयः।
शिक्षामप्यतुलां अवाप्य निभृतं लोकेऽनुगृण्हासिनो
नूनं भूरि जडाशयाननुपदं नीराशयव्याजतः॥ ३४ ॥

रूपं मानुषमेत्य कर्म कृतवान् यद्यत् प्रकृष्टं क्षितौ
सङ्ख्यातुं किमु पार्यते बुधवरैर्वा मादृशैः पामरैः।
देवा दिव्यवपुर्धरा मुनिवराश्शुद्धाशया मानवाः
राक्षस्यः कपयः तथैव विहगास्सन्त्येव ते साक्षिणः॥ ३५ ॥

सङ्कल्पस्तव शोभनः प्रतिहतिं कुत्रापि नैवाश्नुते
ज्ञातं त्वन्मुखतः त्वदीयचरितात् त्वत्सेवकान् मारुतेः।
सीतां च प्रतिबोधयन् विजयसे रक्षाभरं सेवसे
सङ्कल्पं न करोषि मामिह कुतस्त्रातुं स्वकीयं जनम्॥ ३६ ॥

जानाम्येव मदीयपापनिचयं संवर्धमानं सदा
जानन्नप्यवशात् पुनः पुनरपि प्राज्यं तनोम्यवे तत्।
प्रज्ञां नाशयति प्रवर्तयति मां नैवोचिते कर्मणि
प्रायो नष्टमतिः स्मरामि भगवन् मामञ्जसा स्वीकुरु॥ ३७ ॥

साधूनामभिरक्षणाय गतवान् अग्रे स्वयं वेगतः
त्वां सीतानुगता तथा प्रियतरो रामानुजोप्यञ्जसा।

किं सत्यापयितुं समागत इह स्मेराननो मावितुं
सीतालक्ष्मणसंयुतो रघुपते विभ्राजसे मण्डपे॥ ३८॥

सीता सेतुजयादि नामघटनात् रामोऽभिरामो भवन्
नूनं भ्राजस इत्यवैमि तु परं पट्टाभिकल्याणभाक्।
ये च त्वां प्रतियन्ति दैवतमिति प्राञ्चो विपश्चित्तमाः
त्वन्नामैव धरन्ति चारुधिषणः कोदण्डराम प्रभो॥ ३९॥

लोके दण्डधरा भवन्ति बहवः कोदण्डधारी भवेत्
को वा साम्यमुपैतु दण्डधरणात् हस्तेन मस्तेन वा।
कोन्वस्मिन्निति गायता परिचयं संप्रापितस्त्वं परं
कोदण्ड धरमाण एव वहसे नामापि दिव्यं प्रभो॥ ४०॥

विश्वासो मम वर्तते तवपदे भारोऽर्पितस्संप्रति
त्वं मां नैव पीरत्यजेरिति मुहुः प्रत्येमि नक्तन्दिवम्।
अंबा यन्निजगाद नास्ति भुवने योनापराध्येदिति
श्रुत्वोक्तिं कपिशेकरस्य पुरतः को वा न विन्देत् धृतिम्॥ ४१॥

भोक्तव्यं सकलं शुभाशुभफलं कर्मादृतं निश्चितं
वक्तव्यं नहि विद्यतेऽत्र विषये लोकः प्रमाणं प्रभो।
त्वत्सेवाविहतिप्रदायिनि मुधा दुःखाकरे कर्मणि
कस्मात् पातयसीति खेद मधुना जातं तु दूरीकुरु॥ ४२॥

सान्निध्यात् सरसं तथैव वकुलामोदप्रकृष्टं पुरं
आशामाशु शुभेन पूरयसि वा भावेन मे दक्षिणाम्।
शीतोपप्लुत एव तिग्मकिरणं संसेवते प्रायशः
तापं सांसृतिकं प्रपद्य समये त्वां सेवते शीतलम्॥ ४३॥

चित्ते शीतलता न चैव भवतात् शीतावृतस्सर्वतः
सीता शीतगुणा लतेव विटपं त्वामाश्रिता सन्ततम्।
छायां यच्छसि शीतलां श्रितजनेभ्यस्सर्वदा राघव
शैत्यं दुर्गतिदूरकारि भवतश्चापाङ्गयो स्तात् प्रभो॥ ४४॥

तप्तोऽहं भृशदारुणैरतिघनैः दुर्दान्तकर्माग्निभिः
दग्धोऽहं खलभाषणेन वचसा वित्ताशयाचार्दितः।
तृष्णा कर्षति तैलसेचनमिवाङ्गारत्वमाप्तः कलौ
दिव्यापाङ्गनिरीक्षणामृत जलैस्तापं ममापाकुरु॥ ४५॥

निद्रायामपि दुर्निवारसुमहत्स्वप्नानुभूत्या भृशं
वाचा वा मनमापिवा किमपि वा कुर्वन् नयामि क्षणान्।
किं किं न क्रियते गतानुगतिकं रात्रिन्दिवं नश्वर
त्वत्कार्ये न लभ्यते क्षणलवो ब्रूहि प्रभो कारणम्॥ ४६॥

माहात्म्यं तव शाश्वतं श्रुतिशिरोभूषायितं शोभनं
सिद्धं तत् स्वत एव सधुधिषणा प्राञ्चो मुनीन्द्रा जगुः।
स्थूणाखातनयेन राक्षसमुखैर्यद्वा प्लवङ्गाधिपैः
भूयो देवमनुष्यपक्षिनिवहैः सुष्टु प्रतिष्ठाप्यते॥ ४७॥

वाल्मीकिर्विवृणोति षोडशविधप्रश्नेन ते वैभवं
पूर्णं नारदभाषितं विधिवशात् लब्ध्वोत्तराण्यञ्जसा।
तद्रामायणमद्भुतं विजयते सौवर्णमत्युज्वलं
यस्मात् षोडशवर्णवान् विलसति त्वं सर्वदा राघव॥ ४८॥

सेवां ते कथ आप्नवानि लघुतामाश्रित्य सर्वेष्वहं
वर्ते वाचि समः कथं नु भविता वाल्मीकिना भूतले।
चेतो जर्जरितं स्थिरं मुनिरहं नैवास्मि भक्तोत्तमः
कायेनापि कपीश्वरेण तुलना किं स्यात् प्रभो मामव॥ ४९॥

पूर्वैराचरितं तवस्तवन मित्यस्माद्धि हेतोरहं
वर्णानां निचयं समार्पयमिमं स्तोत्रात्मना स्वीकुरु।
सर्वे प्राज्ञतमा नचैव भुवने ज्ञातं त्वयेदं प्रभो
कोदण्डं धरमाण एव कृपया वीक्षस्व मां सांप्रतम्॥ ५०॥

सिद्धार्थे मखासु शोभनदिने दिव्याभिषेकोत्सवे
प्रीतस्सन् करुणाकरोऽर्चकमुखात् श्रीमत्तुलस्या सह।

भूयोऽनुग्रहकाम्यया दिशति मे स्निग्धां दशां स्म प्रभुः
तद्भूत्या परिकल्पितं विलसतु स्तोत्रं सुनीराजनम्॥ ५१ ॥

आत्रेयः कविवादिसिंहगुरुराट् सेवारतस्सन्ततं
प्राज्ञैरद्भुत शेमुषी विलसितैराचार्यवर्यैस्सदा।
प्रीत्या साधु निरीक्षितो व्यरचयत् कोदण्डरामस्तवं
दासः श्रीनिधि राघवो मधुमयः प्रीणातु मे राघवः॥ ५२ ॥

॥ इति श्रीकोदण्डरामपञ्चाशत् संपूर्णा ॥

www.prapatti.com